## अध्याय :- १४ chapter-14

अर्जुन उवाच ।।
कुमारनाथ महात्म्यं यत्त्वयोक्तं कथांतरे ।।
तदहं श्रोतुमिच्छामि विस्तरेण महामुने ।। १

[१]नारद उवाच ।।
तारकं विनिहत्यैव वज्रांग तनयं प्रभुः ।।
गुहः संस्थापयामास लिंगमेतच्च फाल्गुन ।। २

दर्शनाच्छ्रवणाद्ध्यानान्पूजया श्रुतिवंदनैः ।।
सर्वपापापहः पार्थ कुमारेशो न संशयः ।। ३

अर्जुन उवाच ।।[२]
अत्याश्चर्यमयी रम्या कथेयं पापनाशिनी[३] ।।
विस्तरेण च मे ब्रूहि यथातथ्येन नारद ।। ४

वज्रांगः कोऽप्यसौ दैत्यः किं प्रभावश्च तारकः ।।
कथं स निहतश्चैव कथं गुहः[४] ।। ५

कथं संस्थापितं लिंगं कुमारेश्वर संज्ञितम् ।।
किं फलं चास्य लिंगस्य ब्रूहि तद्विस्तरान्मम ।। ६

नारद उवाच ।।
प्रणिपत्य कुमाराय सेनान्ये चेश्वरायच ।।
शृणु चैकमनाः पार्थ कुमारचरितं महत् ।। ७

---

१ ब. श्री नारद   २ अ. ब. इत्या ---   ३ अ. नाशनी
४ अ. ब. गृहX

मानसो ब्राह्मणो:[1] पुत्रो दक्षो नाम प्रजापतिः ।।
षाष्टिं सोऽजनयत्कन्या वीरिण्यां नाम फाल्गुन ।। ८

ददौ स दश[2] धर्माय कश्यपाय त्रयोदश ।।
सप्तविंशतिं सोमाय चतस्रोरिष्टने[3]मिने ।। ९

भूतांगिरः कृशाश्वेभ्यो[4] द्वे द्वे चैव ददौ प्रभुः ।।
नामधेयान्यमुषां च सपत्नीनां च मे शृणु ।। १०

यासां प्रसूतिप्रसवा लोका आपूरितास्त्रयः ।।
भानुर्लम्बा ककुद्भूमिर्विश्वा साध्या मरुत्वती ।। ११

वसुर्मुहूर्ता संकल्पा धर्मपत्न्यः सुताञ्छृणु ।।
भानोस्तु देवऋषभ इन्द्रसेनः सुतोऽभवत् ।। १२

विद्योत आसील्लंबायां ततश्च स्तनयित्नवः ।।
ककुदः शकटः[5] पुत्रः कीकटस्तनयोयतः ।। १३

भुवो[6] दुर्गस्तथा स्वर्गो नंदश्चैव ततोऽभवत् ।।
विश्वेदेवाश्च विश्वाया अप्रजांस्तान्प्रचक्षते ।। १४

---

१ ब. ब्राह्मणोः
२ अ। अ. "दश"
३ अ ---- मध्ये ।।
४ ब. कृताश्वेभ्यो
५ ब. शकदः
६ ब. भवो

साध्याद्वादश साध्याय अर्थसिद्धिस्तु तत्सुतः ।।
मरुतवान्सुजयंतश्च मरुत्वत्या बभुवतुः ।। १५

नरनारायणौ प्राहुर्यौ तौ ज्ञानविदोजनाः[1] ।।
वसोश्च वसवश्चाष्टौ मुहूर्तायां मुहूर्तकाः ।। १६

ये वै फलं प्रयच्छंति भूतानां स्व स्वकालजम् ।।
संकल्पायाश्च संकल्पः कामः संकल्पजः सुतः ।। १७

सुरुपासूतूतनयान्रुदानेका दशैव तु[2] ।।
कपाली पिंगलोभीमो विरुपाक्षो विलोहितः ।। १८

अजकः शासनः शास्ता शंभुश्चात्यो भवस्तथा ।।
रुद्रस्य पार्षदाश्चान्ये विरुपायाः सुताःस्मृताः ।। १९

प्रजापतेरंगिरसः स्वधा पत्नी पितृनथ[3] ।।
जज्ञे सती तथा पुत्रमथर्वांगिरसं प्रभुम् ।। २०

कृशाश्वस्य च द्वे भार्ये अर्चिश्च धिषणा तथा ।।
अस्त्रोग्रामो ययोः पुत्रः ससंहारः प्रकीर्तितः ।। २१

---

१ अ. प्रतौ "द्विजाः" इति स्यात् ।

२ अ. "च" पाठः

३ ब. पतृनथ

पतंगी यामिनी ताम्रा तिमिश्चारिष्टनेमिनः ।।
पतंग्यसूत पतंगान्यामिनी [1]शलभानथ ।। २२

ताम्रायाः [2] श्येनगृध्राद्यास्तिमेर्या दौर्गणास्तथा ।।
अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत् ।। २३

श्रृणु नामानि लोकानां मातृणां शंकराणि च ।।
अदितिर्दितिदनुः सिंही दनायुः सुरभिस्तथा ।। २४

अरिष्टा विनता ग्रावा दयौ [3] क्रोधवशा इरा ।
कद्रूर्मुनिश्च ते चेमे मातरस्ताः प्रकीर्तिताः ।। २५

आदित्याश्चादितेः पुत्राः दितेर्दैत्याः प्रकीर्तिताः ।।
दनोश्च दानवाः प्रोक्ता [4] राहुः सिंहीसुतो ग्रहः ।। २६

दनायुषास्तथा जातौ दनायुश्च गणौ बली ।।
गावश्च सुरभेर्जातारिष्टापुत्रा युगंधराः ।। २७

विनतासूत अरुणं गरुडं च महाबलम् ।।
ग्रावायाः श्वापदाः पुत्रा गणाः [5] क्रोधवशस्तथा ।। २८

---

१. ब. शक
२ ब. ताम्रा
३ अ. तथा
४ अ. पुत्रा
५ अ. क्रोश ---

[1]जातः क्रोधवशाश्च इराया भूरुहाः स्मृताः ।
कद्रूसुताः स्मृतानागा मुनेरप्सरसां गणाः ॥ २९

तत्र द्वौ तनया द्यौ च दितेस्तौ विष्णुनाहतौ ॥
हिरण्यकशिपुर्वीरो हिरण्याक्षस्तथाऽपरः ॥ ३०

ततो निहतपुत्रा सा दितिराराध्य कश्यपम् ॥
अयाचत् वरं देवी पुत्रमन्यं महाबलम् ॥ ३१

समरे शक्रहंतारं स तस्या अददात्प्रभुः ।
नियमे चापि वर्तस्व वर्षाणां च सहस्त्रकम् ॥ ३२

इत्युक्ता सा तथा चक्रे पुष्करस्था समाहिता ।
वर्तन्त्या नियमे तस्याः सहस्त्राक्षः समाहितः ॥ ३३

उपासामाचरदभक्तया सा चैनमन्वमन्यत ।
दशावत्सरशेषास्य सहस्रस्य तदा दितिः ॥ ३४

उवाच शक्रं सुप्रीता भक्तया शक्रस्य तोषिता ।
दितिरुवाच ॥
अत्रोत्तीर्णव्रत[2]पाया विद्धिमां देवसत्तम् ॥ ३५

---

१ ब. जात क्रोध....
२ अ. ब. प्रायाम्

भविष्यति तवभ्राता तेन सार्धमिमां श्रियम् ।
भोक्ष्यसे त्वं यथान्यायं त्रैलोक्यं हतकंटकम् ।। ३६

इत्युक्त्वा निद्रयाविष्टा चरणाक्रांतमूर्धजा ।
दिवासुप्ता क्षितिर्देवी भाव्यर्थबलनोदिता ।। ३७

तत्तु रंध्रमवेक्ष्यैव योगमूर्तिस्तदाविशत्[1] ।
जठरस्थं दितेर्गर्भं चक्रे वज्रेणा सप्तधा ।। ३८

एकैकं च पुनः खण्डं चकार [2]मघवा ततः ।
सप्तधा सप्तधा कोपादुद्बुध्य च ततो दितिः ।। ३९

न हंतव्यो न हंतव्य इति सा शक्रमब्रवीत्[3]।
वज्रेण कृत्यमानानां बुद्धा सा रोदनेन च ।। ४०

ततः शक्रोऽब्रवीत् मा रोदीरिति तांस्तान्यथा/वदत् ।
निर्गत्य जठरात्तमात्ततः प्रांजलिरग्रतः ।। ४१

उवाच वाक्यं चात्रस्तो मातरं रोषपूरिताम् ।
दिवा[4]स्वापं कृथा मातः [5]पादाक्रांत शिरोरुहा ।। ४२

---

१ ब. विषात्

२ अ. ब. "मघवांस्ततः "

३ ब. ब्रवी

४ ब. ''''' स्वप

५ ब. पादः

सुप्ताथ सुचिर वाते[1] छिन्नो गर्भो भया[2] तव ।
कृता[3] एकोनपंचाशद्भागा वज्रेण ते सुताः ।। ४३

सत्यं भवतु ते वाक्यं सार्ध भोक्ष्यामि तैः श्रियम् ।।
दास्यामि तेषां स्थानानि दिवि यावदहंस्थिते ।। ४४

मा रोदीरिति मे प्रोक्ताः ख्याताश्चैव मरुतस्तिवति ।
इत्युक्ता सा च सव्रीडा दितिर्जाता निरुत्तरा ।। ४५

सार्ध तैर्गत्वानिंद्रो दिर्गते[4] वायवः स्मृताः । ५ *
ततः पुनश्चैव भर्तारं दितिः प्रोवाच दुखिता ।। ४६

पुत्रं मे भगवन्देहि शक्रहंतारमूर्जितम् ।
यो नास्त्रशस्त्रैर्वध्यत्वं च गच्छे त्रिदिववासिनाम् ।। ४७

इत्युक्तः स तदोवाच तां पत्नीमतिदुःखिताम् । ४८

दशवर्षसहस्त्राणि तपोनिष्ठा तु तप्स्यसे ।
वज्र सारमयैरंगैरच्छेद्यैरायसैर्दृढैः ।। ४९

---

१ ब. माता

२ ब. भया

३ अ. प्रतौ "कृता" नास्ति ।

४ ब. दिर्वते

५ *= After this sloka, it is written in the M.S.S.'A'
इति श्री स्कंद पुराणे कुमारेश माहात्म्ये मरुत संभवः ।
Next sloka begins with श्री नारद
उवाच ।। which is not appear in the P.W.

वज्रांगो नाम [1]पुत्रस्ते भविता * धर्मवत्सलः ।
सा तु लब्धवरा देवी जगाम तपसे वनम् ।। ५०

दशवर्षसहस्त्राणि तपो घोरं समाचरेत् ।
तपसोऽते भगवती जनयामास दुर्जयम् ।। ५१

पुत्रमप्रतिकर्माणमजेयं वज्रदुश्छिदम् ।
स ~~[illegible]~~ जातमात्र एवाभूत्सर्वशास्त्रार्थ पारगः ।। ५२

उवाच मातरं भक्त्या मातः किं करवाण्यहम् ।
तमुवाच ततो हृष्टा दितिर्दैत्याधिपं सुतम् ।। ५३

बहवो मे हताः पुत्राः[2] सहस्त्राक्षेण पुत्रक[3] ।
तेषामपचितिं कर्तुमिच्छे शक्रवधादहम् ।। ५४

बाढमित्येव स प्रोच्य जगाम त्रिदिवं बली ।
ससैन्यं समरे शक्रं स च बाहुयायुधोऽजयत् ।। ५५

पादेनाकृष्य देवेन्द्रं सिंहः क्षुद्रमृगं यथा ।
मातुरंतिकमानिच्छद्याचमानं भयातुरम् ।। ५६

---

१ अ प्रतौ "भविता पुत्रस्ते" इति स्यात् ।
२ ब पुत्रा
३ ब पुत्रका

एतस्मिन्नंतरे ब्रह्माकश्यपश्च महातपाः ।
आगतौ तत्र संत्रस्तावथो ब्रह्मा जगाद तम् ।। ५७

मुंचामुं पुत्र याचेतं किमनेन प्रयोजनम् ।
अवमानो[१] वधः प्रोक्तो वीर संभावितस्य च ।। ५८

अस्मद्वाक्येन यो मुक्तो जीवन्नपि मृतो हि सः ।
शत्रुं ये घ्नंति समरे न ते वीराः प्रकीर्तिताः ।। ५९

कृत्वा मान[२] परिग्लानिं य[३] मुंचंति वरा हि ते ।
यथामान्यतमं मत्वा त्वया मातुर्वचः कृतम् ।। ६०

तथा पितुर्वचः कार्यं मुचामुं पुत्र वासवम् ।।
एतच्छ्रुत्वा तु वज्रांगः प्रणतो वाक्यमब्रवीत् ।। ६१

न मे कृत्यमनेनास्ति मातुराज्ञा कृता मया ।
त्वं सुरासुरनाथो वै मम च प्रपितामहः ।। ६२

करिष्ये त्वद्वचो देव एष मुक्तः शतक्रतुः ।।
न मे च कांक्षा शक्रभुक्तामिमां त्रैलोक्य राजताम् ।। ६३

---

१ अ. ब. अवमानं
२ अ. परागलानिं
३ अ. यं

यच्च त्रिभुवनेष्वस्ति सारं तन्मम कथ्यताम् ।। ६४

ब्रह्मोवाच ।।
तपसो न परं किंचितपो हि महतांधनम् ।
तपसा प्राप्यते सर्वं तपोयोग्योऽसि पुत्रक ।। ६५

वज्रांगयवाच ।।
तपसे[१] मे रतिर्देव न विघ्नंतत्रमे भवेत् ।
त्वत्प्रसादेन भगवन्नित्युक्तवा विरराम सः ।। ६६

ब्रह्मवेवाच ।।
क्रूरभावं परित्यज्य यदीच्छसि तपः सुत ।
अनया चितबुद्धया तत्वयाप्तं जन्मनः फलम् ।। ६७

इत्युक्तवा पद्मजः कन्यां ~~सक्र~~ सच्चार्चितलोचनाम् ।
तामस्मै प्रददौ दैवः पत्न्यर्थं पद्मसंभवः ।। ६८

वरांगीति[२] च नामास्याः कृतवांश्च पितामहः ।
जगाम च ततो ब्रह्माकश्यपेन समं ~~क्षिव~~ दिवम् ।। ६९

वज्रांगोऽपि तया सार्धं जगाम तपसेवनम् ।
ऊर्द्धबाहुः स दैत्येंद्रोऽतिष्ठदब्द सहस्त्रकम् ।। ७०

---

१ अ. तपसो
२ ब. वरांगिति

कालं कमलपत्राक्षः स शुद्धबुद्धिर्महातपाः ।
तावानवोमुखः कालं तावत्पंचाग्निसाधकः ।। ७१

निराहारो घोरतपास्तपोराशिरजायत ।
ततः सो/तर्जले चक्रे कालं वर्षं सहस्त्रकम् ।। ७२

जलांतरप्रविष्टस्य तस्य पत्नी महाव्रता ।
तस्यैव तीरे सरसस्तत्परा मौनमाश्रिता ।। ७३

निराहारं पतिं मत्वा तपस्तेपे पतिव्रता ।
तस्यास्तपसि वर्तंत्या इंद्रश्चक्रे विभीषिकाम्[1] ।। ७४

भूत्वा तु मर्कटाकारस्तस्या[2] अभ्याशमागतः ।
अपविध्ये दुर्शं तस्या[3] मूत्रविष्ठे चकार सः ।। ७५

तथा विलोलवसनां विलोलवदनां तथा ।
विलोलकेशां तां चक्रे विधित्सुस्तपसः क्षतिम्[4] ।। ७६

ततश्च मेषारूपेण[5] क्लेशं तस्याश्चकार सः ।
ततो भुजंगरूपेण बद्ध्वा चरणयोर्द्वयोः ।। ७७

---

१ अ. ब बिभीषिकां

२ अ. प्रतौ "श्रमपदं महत् " इत्ययं पाठः ।

३ अ. प्रतौ "पुष्य तोयं चकार सः" इत्ययं पाठः ।

४ ब. क्षितिं

५ अ. ब. मेघरूपेण

अपाकर्षति दूरं स तस्मादेवभूतस्तथा ।
तपोबलाच्च सा तस्य न वध्यत्वं जगामह ।। ७८

क्षमया च महाभार्गी[१] क्रोधमण्यपि ना करोत् ।
ततो गौमायुरूपेण तमदूषायदाश्रमम् ।। ७९

अग्निरूपेण तस्याश्रं[२] स दयाहु महाश्रमम् ।
चकर्ष वायुरूपेण महोग्रेण च तां शुभाम् ।।
एवं सिंह वुकाद्याभिर्भीषिकाभिः पुनः पुनः ।। ८०

वीर राम यदा नैव वज्रांगमहिषी तदा ।
शैलस्य दुष्टतां मत्वा शापं दातुं व्यवस्यत[३] ।। ८१

तां शापाभिमुखीं दृष्वाशैलः पुरुषाविग्रहः ।
उवाच तां वरारोहां त्वरयाथ सुलोचनाम् ।। ८२

शैलउवाच ।।[४]
नाहं महाव्रते दुष्टः सेव्योऽहं सर्वदेहिनाम् ।
अतिखेदं करोत्येष्ा ततः[५] क्रुद्धस्तु वृत्रहा ।। ८३

एतस्मिन्नंतरे जातः कालो वर्ष[६] सहस्त्रिकः ।
तस्मिन्याते स भगवान्काले कमल संभवः ।। ८४

---

१ अ. महाभार्ग
२ ब. सदा दाह
३ अ. व्यवस्थिता
४ ब. शैल उ० ।।
५ अ. तव
६ अ. ~~ब्रह्म~~ सहस्त्रकं

तुष्टः प्रोवाच वज्रांगं तमागम्य [1]जलाशये ।। ८५

ब्रह्मोवाच ।।[2]
ददामि सर्वकामांस्ते उत्तिष्ठ दितिनन्दन ।
एवमुक्तस्तदोत्थाय दैत्येंद्रस्तपसां निधिः ।।
उवाच प्रांजलिर्वाक्यं सर्वलोकपितामहम् ।। ८६

वज्रांग उवाच ।।
आसुरो मे ऽस्तु मा भावः शक्रराज्ये च मा रतिः ।
तपोधर्मरतिश्चास्तु वृणोम्येतत्पितामह ।। ८७

एवमस्त्विति तं ब्रह्मा प्राह विस्मितमानसः ।
उपेक्षेते च शक्रं स भाव्यर्थं को ऽतिवर्तते ।। ८८

ऋषयो मनुजा देवाः शिवब्रह्ममुखा अपि ।
भाव्यर्थं नाति वर्तंते वेलामिव महोदधिः ।। ८९

इति चिंत्यं विरंचो ऽपि तत्रैवांतरधीयत ।
वज्रांगो ऽपि समाप्ते तु तपसि स्थिरसंयमः ।। ९०

आहारमिच्छन्स्वां भार्यां न ददर्शाश्रमे स्वके ।
भार्याहीनो ऽफलश्चेति स संचिंत्य इतस्ततः ।। ९१

---

१ अ. जलाशयं
२ ब. ब्रह्मा उ०

विलोक्यन्स्वकां भार्यां विधित्सुः कर्म नैत्यकम ।
विलोक्यन्यदर्शाथ इहामुत्र सहायिनीम् ।। ९२

रुदन्तीं स्वां प्रियां दीनां तरुप्रच्छादिताननाम ।
तां विलोक्य ततो दैत्यः प्रोवाचपरिसांत्वयन् ।। ९३

वज्रांग उवाच ।।
केन तेऽपकृतं भीरु वर्तंत्यास्तपसिस्वके ।
कथं रोदिषि वा बाले मयि जीवति भर्तरि ।
कं वा कामं प्रयच्छामि शीघ्रं[1]प्रब्रूहिभामिमि[2] ।। ९४

गृहेश्वरीं सद्गुणभूषितां शुभां पंऽबंधयोगेन पतिं समेताम् ।
नलालयेत्पूरयेन्नैव कामं सकिं पुमान्न पुमान्मे मतोस्ति ।। ९५

इति श्री स्कांदे महापुराणे एकाशीतसाहस्त्र्यां संहितायां प्रथमे माहेश्वर खण्डे कौमारिका खण्डे कुमारेश्वरमाहात्म्ये वज्रांगेतिहास वर्णनं नाम चतुर्दशोऽध्यायः ।।

---

१ अ. पब्रूहि

२ ब. भामिति

३ अ. इति श्री स्कंद पुराणे कुमारिकाखंडे कुमारेश माहात्म्ये वज्रांगतपो वर्णन शक्रापराधः ।।

ब. इति श्री स्कंदपुराणे कुमारिकाखंडे कुमारेश्वर माहात्म्यं चतुर्दशोध्यायः ।। १४ ।।